# .. Shri Venkateshavijayaryasaptavibhaktistotram ..

# ॥ શ્રીવેઙ્કટેશવિજયાર્યાસપ્તવિભક્તિસ્તોત્રમ્ ॥

## Document Information

Text title : shrIveNkaTeshavijayAryAsaptavibhaktistotram
File name : shrIveMkaTeshavijayAryAsaptavibhaktistotram.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : Venkatesha Kavyakalapa
Latest update : April 4, 2015
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ શ્રીવેઙ્કટેશવિજયાર્યાસપ્તવિભક્તિસ્તોત્રમ્ ॥

શ્રીવેઙ્કટાદ્રિધામા ભૂમા ભૂમાપ્રિયઃ કૃપાસીમા ।
નિરવધિકનિત્યમહિમા ભવતુ જયી પ્રણતદર્શિતપ્રેમા ॥ ૧॥

જય જનતા વિમળીકૃતિસફલીકૃતસકલમઙ્ગલાકાર ।
વિજયી ભવ વિજયી ભવ વિજયી ભવ વેઙ્કટાચલાધીશ ॥ ૨॥

કનીયમન્દહસિતં કઞ્ચન કન્દર્પકોટિલાવણ્યમ્ ।
પશ્યેયમઞ્જનાદ્રૌ પુંસાં પૂર્વતનપુણ્યપરિપાકમ્ ॥ ૩ ॥

મરતકમેચકરુચિના મદનાજ્ઞાગન્ધિમધ્યહૃદયેન ।
વૃષશૈલમૌલિસુહૃદા મહસા કેનાપિ વાસિતં જ્ઞેયમ્ ॥ ૪॥

પત્યૈ નમો વૃષાદ્રેઃ કરયુગપરિકર્મશઙ્ખચક્રાય ।
ઇતરકરકમલયુગલીદર્શિતકટિબન્ધદાનમુદ્રાય ॥ ૫॥

સામ્રાજ્યપિશુનમકુટીસુઘટલલાટાત્ સુમઙ્ગલા પાઙ્ગાત્ ।
સ્મિતરુચિફુલ્લકપોલાદપરો ન પરોઽસ્તિ વેઙ્કટાદ્રીશાત્ ॥ ૬॥

સર્વાભરણવિભૂષિતદિવ્યાવયવસ્ય વેઙ્કટાદ્રિપતેઃ ।
પલ્લવપુષ્પવિભૂષિતકલ્પતરોશ્ચાપિ કા ભિદા દૃષ્ટા ॥ ૭॥

લક્ષ્મીલલિતપદામ્બુજલાક્ષારસરઞ્જિતાયતોરસ્કે ।
શ્રીવેઙ્કટાદ્રિનાથે નાથે મમ નિત્યમર્પિતો ભારઃ ॥ ૮॥

આર્યાવૃત્તસમેતા સપ્તવિભક્તિર્વૃષાદ્રિનાથસ્ય ।
વાદીન્દ્રભીકૃદાખ્યૈરાર્યૈ રચિતા જયત્વિયં સતતમ્ ॥ ૯॥

॥ ઇતિ શ્રીવેઙ્કટેશવિજયાર્યાસપ્તવિભક્તિસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

.. Shri Venkateshavijayaryasaptavibhaktistotram ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*